Shri Raghunatha Temple MSS. Library,
JAMMU

No. १०८ / घ

Title सिद्धान्तकौमुदीसारः

Author

Extent २० पत्र Age

Subject व्याकरण

© Dharmartha Trust J&K. Digitized by eGangotri

सिद्धान्त सारकौमुदी सारः

१०५

२० पत्राणि

© Dharmartha Trust J&K. Digitized by eGangotri

नं. १०८घ

सिद्धान्त कौमुदी सार:

(अपूर्ण:)

२० पत्राणि

व्याकरणम्

श्री रणवीर पुस्तकालय
सं. ८५
नं. १:२
जम्मू

© Dharmartha Trust J&K. Digitized by eGangotri

सि·कौ

।।श्रीगणेशायनमः।।श्रीगणेशंनमस्कृत्यपाणिन्यादीँश्चकौतुकात्‌·सिद्धांतकौ
मुदीसारंसंगृह्णामिशिशुप्रियं।।१ अइउण्‌ ऋलृक्‌ एओङ्‌ ऐऔच्‌ हयव
रट्‌ लण्‌ ञमङणनम्‌ झभञ्‌ घढधष्‌ जबगडदश्‌ खफछठथचटतव्‌
कपय्‌ शषसर्‌ हल्‌ इतिमाहेश्वराणिसूत्राण्यणादिसंज्ञार्थानि एषामंत्याइतः
लण्सूत्रेअकारश्च हकारादिष्वकारउच्चारणार्थः हलंत्यं हलितिसूत्रेअंत्य
मित्स्यात्‌ आदिरंत्येनसहेता अंत्येनेतासहितआदिर्मध्यगानांस्वस्यचसंज्ञास्या
त्‌ इतिहल्संज्ञायाम्‌ हलंत्यं उपदेशेऽंत्यंहलित्स्यात्‌ उपदेशआद्योच्चारणम्‌
ततोऽण्अच्‌इत्यादिसंज्ञासिद्धौ उपदेशेजनुनासिकइत्‌ उपदेशेअनुनासिको
ऽजित्संज्ञःस्यात्‌ प्रतिज्ञानुनासिक्याःपाणिनीयाः लण्सूत्रस्थावर्णेनसहोच्चा १

© Dharmartha Trust J&K. Digitized by eGangotri

येमाणेरेफोरलयोः संज्ञा प्रत्याहारेष्वितां नग्रहणं अनुनासिक इत्यादिनि
र्देशात् न ह्यत्र ककारे परे अच्कार्यं दृश्यते आदिरंत्येनेत्येतत्सूत्रेण कृताः
संज्ञाः प्रत्याहारशब्देन व्यवह्रियंते ऊकालोह्रस्वदीर्घप्लुतः उश्च ऊश्च ऊँश्च
वः वां काल इव कालो यस्य सो चक्रमाद् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् स प्रत्येकमुदात्ता
दिभेदेन त्रिधा उच्चैरुदात्तः ताल्वादिषु सभागेषु स्थानेषु ऊर्द्ध्वभागे निष्पन्नोऽजु
दात्तसंज्ञः स्यात् आये नीचैरनुदात्तः स्पष्टं अर्वाङ् समाहारः स्वरितः उदात्ता
नुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात् तस्यादित उदा
त्तमर्द्धह्रस्वं ह्रस्वग्रहणमतंत्रम् स्वरितस्यादितोऽर्द्धमुदात्तं बोध्यम् उत्तरार्द्धं तु
परिशेषादनुदात्तं तस्य चोदात्तस्वरितपरत्वे श्रवणं स्पष्टं अन्यत्र तूदात्तश्रुतिः

© Dharmartha Trust J&K. Digitized by eGangotri

प्रातिशाख्येप्रसिद्धा क वोध्वाः रथानांनयेराः शतचक्रंयोह्यः इत्यादिष्वनुदात्तः
अग्निमीळेइत्यादावुदात्तश्रुतिः सनवविधोपिप्रत्येकमनुनासिकाननुनासिक
त्वाभ्यांद्विधा मुखनासिकावचनोनुनासिकः मुखसहितनासिकयोच्चार्यमाणो
ऽनुनासिकसंज्ञः स्यात् तदित्थं अइउऋऌ एषांवर्णानांप्रत्येकमष्टादशभेदाः ऌ
वर्णस्यद्वादशतस्यदीर्घाभावात् एचामपिद्वादशतेषांह्रस्वाभावात्॥ तुल्यास्यप्र
यत्नंसवर्णं ताल्वादिस्थानमाभ्यंतरप्रयत्नश्चेत्येतद्द्वयंयस्ययेनतुल्यंतन्मिथः
सवर्णंस्यात् अकुहविसर्जनीयानांकंठः इचुयशानांतालु ऋटुरषाणांमूर्द्धा ऌ
तुलसानांदंताः उपूपध्मानीयानामोष्ठौ ञमङणनानांनासिकाच एदैतोःकंठ
तालु ओदौतोःकंठोष्ठं वकारस्यदंतोष्ठं जिह्वामूलीयस्यजिह्वामूलं नासिका

© Dharmartha Trust J&K. Digitized by eGangotri

नुस्वारस्य इतिस्थानानियत्नोद्विधा आभ्यंतरोबाह्यश्च आद्यश्चतुर्द्धा स्पृष्टेषत्स्पृ
ष्टविवृतसंवृतभेदात् तत्रस्पृष्टंप्रयतनंस्पर्शानां ईषत्स्पृष्टमंतस्थानांविवृतमूष्म
णांस्वराणांच ह्रस्वस्यावर्णस्यप्रयोगेसंवृतं प्रक्रियादशायांतुविवृतमेव एतच्चसू
त्रकारेणज्ञापितं तथाहि अअविवृतमनूद्यसंवृतोऽनेनविधीयते अस्यचाष्टाध्या
यींसंपूर्णांप्रत्यसिद्धत्वात्शास्त्रदृष्ट्याविवृतत्वमस्त्येव तथाचसूत्रं पूर्वत्रासिद्धं अधि
कारोयं तेनसपादसप्ताध्यायींप्रतित्रिपाद्यसिद्धात्रिपाद्यामपिपूर्वंप्रतिपरंशास्त्रम
सिद्धं बाह्यप्रयत्नस्त्वेकादशधा विवारःसंवारःश्वासोनादोघोषोऽघोषोऽल्पप्राणोम
हाप्राणउदात्तोऽनुदात्तःस्वरितश्चेति खयांयमाःखयःकःपौविसर्गःशरएवच एते
श्वासानुप्रदानाअघोषाश्चविवृण्वते कंठमन्येतुघोषाःस्युःसंवृतानादभागिनःअ

© Dharmartha Trust J&K. Digitized by eGangotri

कौ॰ सार॰ युग्मा वर्गे यमगा यणश्चाल्पासवः स्मृताः ॥२॥ वर्गेष्वाद्यानां चतुर्णां पंचमे परे मध्ये
२ यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः पलिक्नीः चक्नतुः अग्निः घ्नंतीत्य
3 त्र क्रमेण कखगघेभ्यः परे नत्सदृशा एव यमाः तत्र वर्गाणां प्रथमद्वितीयाः खयः त
था तेषां एव यमाः जिह्वामूलीयोपध्मानीयौ विसर्गः शषसाश्चेत्येतेषां विवारः श्वासो
ऽघोषश्च अन्येषां तु संवारो नादो घोषश्च वर्गाणां प्रथमतृतीयपंचमाः प्रथमतृतीय
यमौ यरलवाश्चाल्पप्राणाः अन्ये महाप्राणा इत्यर्थः बाह्यप्रयत्नाश्च यद्यपि सवर्ण
संज्ञायामनुपयुक्तास्तथाप्यांतरनम्यपरीक्षायामुपयोक्ष्यन्त इति बोध्यं कादयो मा
वसानाः स्पर्शाः यरलवा अंतस्थाः शषसहा ऊष्माणः अचः स्वराः ᳵक ᳶप इति कपा
भ्यां प्रागर्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ अं अः इत्यचः परावनुस्वारवि २

© Dharmartha Trust J&K. Digitized by eGangotri

सर्गौ इति प्रयत्नविवेकः ऋ‍ऌवर्णयोर्मिथः सावर्ण्यं वाच्यं अकारहकारयोरिका
रशकारयोरृकारषकारयोर्ऌकारसकारयोश्च सावर्ण्ये प्राप्ते नाज्झलौ आकार
सहितो अच् आच् स च हल् चेत्येतौ न मिथः सवर्णौ स्तः तेन दधीत्यस्य हरति शीतलं
षष्ठं सान्द्रं इत्येतेषु यणादिकं न अन्यथा दीर्घादीनामिव हकारादीनामपि ग्रहणकशा
स्त्रवलादचूत्वं स्यात् तथाहि अणुदित्सवर्णस्य चाप्रत्ययः प्रतीयते विधीयते इति प्र
त्ययः अविधीयमानो अण् उदिच्च सवर्णस्य संज्ञा स्यात् अत्रैवाण् परेण णकारेण
कुचुटुतुपु एते उदितः तदेवमष्टादशानां संज्ञा तथेकारोकारौ ऋकारस्त्रिंशतः
एवं ऌकारोपि एचो द्वादशानां एदैतोरोदौतोश्च न मिथः सावर्ण्यं ऐऔजिति सूत्रारंभ
सामर्थ्यात् तेनैव चश्चतुर्विंशतेः संज्ञाः स्युः इति नापादनीयं नाज्झलाविति निषेधोय

© Dharmartha Trust J&K. Digitized by eGangotri

घष्याक्षरसमाम्नायिकानामेवतथापिहकारस्याकारोनसवर्णः तत्राकारस्यापिप्रश्लि
ष्टत्वात् तेनविश्वपाभिरित्यत्रहोढइतिढत्वंनभवति अनुनासिकाननुनासिकभेदे
नयवलाद्विधातेनानुनासिकास्तेद्वयोर्द्वयोःसंज्ञाः तपरस्तत्कालस्य तःपरोयस्मा
त्सचतात्परश्चोच्चार्यमाणसमकालस्यैवसंज्ञास्यात् तेनअत् इत् उत् इत्यादयःष
ण्णांषण्णांसंज्ञाः॥आदितिद्वादशानां॥वृद्धिरादैच्॥आच्चऐच्चवृद्धिसंज्ञःस्यात्॥अदे
ङ्गुणः॥अदेङ्चगुणसंज्ञःस्यात्॥भूवादयोधातवः॥क्रियावाचिनोभ्वादयोधातुसंज्ञाः
स्युः॥प्राग्रीश्वरान्निपाताइतिअधिकृत्यचादयोऽसत्वे॥अद्रव्यार्थाश्चादयोनिपातसं
ज्ञाःस्युः॥प्रादयः॥अद्रव्यार्थाःप्रादयस्तथा॥उपसर्गाःक्रियायोगेगतिश्च॥प्रादयःक्रि
यायोगेउपसर्गसंज्ञागतिसंज्ञाश्चस्युः॥प्र॰परा॰अप॰सम्॰अनु॰अव॰निस्॰निर्॰दु

© Dharmartha Trust J&K. Digitized by eGangotri

सम्·दुर्·वि·आङ् नि·अधि अपि·अति·सु·उत्·अभि·प्रति·परि·उप·एते प्रादयः
॥ नवेति विभाषा॥ निषेधविकल्पयोर्विभाषासंज्ञा स्यात्॥ स्वं रूपं शब्दस्याशब्दसं
ज्ञा॥ शब्दस्य स्वं रूपं संज्ञि शब्दशास्त्रे या संज्ञा तां विना॥ येन विधिस्तदंतस्य॥ विशेष
णं तदंतस्य संज्ञा स्यात्स्वस्य च स्वरूपस्य॥ समासप्रत्ययविधौ प्रतिषेधः॥ उगिद्वर्णग्र
हणवर्जं॥ विरामोवसानं॥ वर्णानामभावोऽवसानसंज्ञः स्यात्॥ परः संनिकर्षः संहि
ता॥ वर्णानामतिशयितः संनिधिः संहितासंज्ञः स्यात्॥ सुप्तिङंतं पदं॥ सुबंतं तिङंतं
च पदसंज्ञं स्यात्॥ हलोनंतराः संयोगः अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः
ह्रस्वलघु संयोगे गुरु संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात् दीर्घं च इति संज्ञाप्रकरणं इ
को गुणवृद्धी गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्रेक इति षष्ठ्यंतं पदमुप

© Dharmartha Trust J&K. Digitized by eGangotri

कौ॰सार॰
५
5

त्तिष्ठते अचश्च ह्रस्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्राच इति षष्ठ्यंतं पदं उप
त्तिष्ठते आद्यंतौ टकितौ टित्कितौ यस्योक्तौ तस्य क्रमादाद्यंतावयवौ स्तः मिदचों
त्यात्परः अच इति निर्द्धारणे षष्ठी अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवांतावयवो
मित्स्यात् षष्ठीस्थानेयोगा अनिर्द्धारितसंबंधविशेषा षष्ठी स्थानेयोगा बोध्या स्था
नेच प्रसंगः स्थानेऽन्तरतमः प्रसंगे सति सदृशतम आदेशः स्यात् । यत्रानेकविध
मांतर्यं तत्र स्थानत आंतर्यं बलीयः तस्मिन्निति निर्दिष्टे पूर्वस्य सप्तमीनिर्देशेन
विधीयमानं कार्यं वर्णांतरेणाव्यवहितस्य पूर्वस्य बोध्यं तस्मादित्युत्तरस्य पंच
मीनिर्देशेन क्रियमाणं कार्यं वर्णांतरेणाव्यवहितस्य परस्य ज्ञेयम् अलोऽन्त्यस्य
षष्ठीनिर्दिष्टोऽन्त्यस्यादेशः स्यात् ङिच्च अयमप्यंत्यस्य स्यात् सर्वस्येत्यस्या

© Dharmartha Trust J&K. Digitized by eGangotri

पवादः आदेः परस्य परस्य यद्विहितं तत्तस्यादेर्बोध्यं॥ अलोन्त्यस्येत्यस्यापवादः
॥ अनेकाल्शित्सर्वस्य॥ स्पष्टं॥ अलोन्त्यसूत्रापवादः॥ अष्टाभ्य औशित्यादावादेः
परस्येत्येतदपि परत्वादनेन बाध्यते॥ स्वरितेनाधिकारः॥ स्वरितत्वयुक्तं शब्दस्वरू
पमधिकृतं बोध्यं॥ परनित्यांतरंगापवादानामुत्तरमुत्तरं बलीयः॥ असिद्धं बहिरंग
मंतरंगे॥ अकृतव्यूहाः पाणिनीयाः निमित्तविनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कु
र्वंतीत्यर्थः॥ इति परिभाषाप्रकरणं इको यणचि॥ इकः स्थाने यण् स्यादचि सं
हितायां विषये॥ सुधी उपास्य इति स्थिते॥ स्थानंतरआंतर्यादिकारस्य यकारः॥ सुध्
य् उपास्य इति स्थिते॥ अनचि च॥ अचः परस्य यरो द्वे वास्तो न त्वचि॥ इति धकार
स्य द्वित्वे॥ स्थानिवदादेशोऽनल्विधौ॥ आदेशः स्थानिवत्स्यान्न तु स्थान्यलाश्रय

© Dharmartha Trust J&K. Digitized by eGangotri

कौ·सार·
६

विधौ ॥ अनेनेह यकारस्य स्थानिवद्भावेनाच्त्वमाश्रित्यानचीति द्वित्वनिषेधो न शं
क्यः न ल्विधावितितन्निषेधात् अचः परस्मिन्पूर्वविधौ ॥ अल्विध्यर्थमिदं ॥ पर
निमित्तोऽजादेशः स्थानिवत्स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्त्तव्ये ॥ इ
तियणः स्थानिवद्भावे प्राप्ते ॥ न पदांतद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घज
श्चर्विधिषु ॥ परस्य चरमावयवे द्विर्वचनादौ च कर्त्तव्ये परनिमित्तोऽजादेशो न स्था
निवत्स्यात् ॥ इति स्थानिवद्भावनिषेधः ॥ झलां जश् झशि ॥ स्पष्टं ॥ इति धकारस्य द
कारः ॥ अदर्शनं लोपः ॥ प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् ॥ संयोगांतस्य लोपः ॥ सं
योगांतं यत्पदं तस्य लोपः स्यात् ॥ इति लोपे प्राप्ते ॥ यणः प्रतिषेधो वाच्यः ॥ यणो मयो
द्वे वाच्ये मय इति पंचमी यण इति षष्ठीति पक्षे यकारस्यापि द्वित्वं ॥ तदिह धकारय ६

कारयोर्द्वित्वविकल्पाच्चत्वारि रूपाणि एकधमेकयं द्विधं द्वियं द्विधमेकयं एकधं द्वियं सुद्ध्युपास्यः मद्ध्वरिः धात्त्रंशः लाकृतिः नादिन्याक्रोशे पुत्रस्य पुत्रशब्दस्य न द्वे स्त आदिनि परे आक्रोशे गम्ये पुत्रादिनी त्वमसि पापे आक्रोशे किं तत्वकथने द्विर्वचनं भवत्येव पुत्रादिनी सर्पिणी तत्परे च पुत्रपुत्रादिनी त्वमसि पापे वा हतजग्ध्योः पुत्रहती पुत्रहती पुत्रजग्धी पुत्रजग्धी त्रिप्रभृतिषु शाकटायनस्य आदिषु वर्णेषु संयुक्तेषु वा द्वित्वे इन्द्रः इन्द्द्रः राष्ट्रं राष्ट्ट्रं सर्वत्र शाकल्यस्य द्वित्वं न अर्कः ब्रह्मा दीर्घादाचार्याणां द्वित्वं न दात्रं पात्रं अचो रहाभ्यां द्वे अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः हय्य्यनुभवः न ह्यस्ति हलो यमां यमि लोपः हलः परस्य यमो लोपः स्याद्वा यमि इति लोपपक्षे द्वित्वाभावपक्षे चैकयं रूपं तुल्यं लोपारंभफलं तु आदित्यो देवतास्य आदि

© Dharmartha Trust J&K. Digitized by eGangotri

कौ॰सार॰ त्वंहविः यमांयमीतियथासंख्यविज्ञानान्नेह माहात्म्यं एचोयवायावः एचःक्रमा
७ दयू अवू आयू आवू एते स्युरचि तस्यलोपः तस्येतोलोपःस्यात् इतियवयोर्लोपोन
7 उच्चारणसामर्थ्यात् एवंचेत्संज्ञापीहनभवति हरये विष्णवे नायकः पावकः वांतो
यिप्रत्यये यकारादौप्रत्ययेपरेओदौतोरवूआवूएतौस्तः गोर्विकारोगव्यं गोपयसो
र्यत् नावातार्यंनाव्यं नौवयोधर्मेत्यादिनायत् गोर्यूतौछंदस्युपसंख्यानं अध्वपरि
माणेच गव्यूतिः ऊतियूतीत्यादिनायूतिशब्दोनिपातितः वांतइत्यत्रवकाराओर्यू
नावित्यत्रछकाराद्यपूर्वभागेलोपोव्योरितिलोपेनवकारःप्रश्लिष्यतेतेनश्छ्यमा
एवकारांतआदेशःस्यात् वकारोनलुप्यतइतियावत् धातोस्तन्निमित्तस्यैव या
दौप्रत्ययेपरेधातोरेचश्चेद्वांतादेशस्तर्हितन्निमित्तस्यैवनान्यस्य लव्यं अवश्यला ७

© Dharmartha Trust J&K. Digitized by eGangotri

व्यं तन्निमित्तस्यैवेति किं श्रायते औयत क्षय्यजय्यौ शक्यार्थे यांतादेश निपात
नार्थमिदं क्षेतुं शक्यं क्षय्यं जेतुं शक्यं जय्यं शक्यार्थे किं क्षेतुं जेतुं योग्यं क्षेयं जेयं पा
पं मनः क्रय्यस्तदर्थे तस्मै प्रकृत्यर्थायेदं तदर्थं क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्र
सारितं क्रय्यं क्रेयमन्यत् क्रयणार्हमित्यर्थः लोपः शाकल्यस्य अवर्णपूर्वयोः पदांत
योर्यकारवकारयोर्लोपो वाऽशि परे पूर्वत्रासिद्धमिति लोपशास्त्रस्यासिद्धत्वात् नस्व
रसंधिः हर एहि हरयेहि विष्णइह विष्णविह श्रिया उद्यतः श्रियायुद्यतः गुरा उत्कः
गुरावुत्कः कानि संति कौस्तः इत्यत्रास्तेरल्लोपस्य स्थानिवत्त्वेन यणावादेशौ प्राप्तौ न
पदांतेति सूत्रेण पदांतविधौ तन्निषेधान्नस्तः एकः पूर्वपरयोरित्यधिकृत्य आद्गुणः
अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात्संहितायां उपेंद्रः रमेशः गंगोदकं

© Dharmartha Trust J&K. Digitized by eGangotri

कौ॰सार॰
८
8

उरण्रपरः स्र इति त्रिंशत्तः संज्ञेत्युक्तं तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्त्तते तत्रांत
रतम्यात् कृष्णर्द्धिरित्यत्रार् तवल्कार इत्यत्राल् अचो रहाभ्यामिति पक्षे द्वित्वं झरो झ
रि सवर्णे हलः परस्य झरो लोपो वा स्यात्सवर्णे झरि द्वित्वाभावे लोपे सति एकधं अस
ति लोपे द्वित्वलोपयोर्वा द्विधं सति द्वित्वे लोपे चासति त्रिधं कृष्णर्द्धिः यण इति पंचमी
मय इति षष्ठीति पक्षे ककारस्य द्वित्वं लस्य लन न्वि चेति तेन तवल्कार इत्यत्र रूपच
तुष्टयं द्वित्वं लस्यैव कस्यैव नोभयोः भयोरिति॰ तवल्कारादिषु बुधैर्बोध्यं रूपचतु
ष्टयं वृद्धिरेचि आदेचि परे वृद्धिरेकादेशः स्यात् गुणापवादः कृष्णैकत्वं गंगौघः देवै
श्वर्यं कृष्णौत्कंठ्यं एत्येधत्यूठ्सु अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः
स्यात् पररूपगुणापवादः उपैति उपैधते प्रष्ठौहः एजाद्योः किं उपेतः माभवान्प्र ८

© Dharmartha Trust J&K. Digitized by eGangotri

ऽधित् पुरस्तादपवादन्यायेनेयं वृद्धिरेङि पररूपस्यैव बाधिका न त्वोमाङोश्चेत्य
स्य तेनावैहीति वृद्धिरसाधुरेव अक्षादूहिन्यामुपसंख्यानं अक्षौहिणीसेना स्वादी
रेरिणोः स्वैरः स्वेनेरितुं शीलमस्येति स्वैरी स्वैरिणी प्रादूहोढोढ्येषैष्येषु प्रौहः प्रौढः
अर्थवद्ग्रहणे नानर्थकस्य ग्रहणं व्रश्चेति सूत्रे राजेः पृथक्भ्राजिग्रहणात् तेन ऊढ
ग्रहणे क्तान्तमेव गृह्यते न तु क्तवत्वन्तस्यैकदेशः प्रौढवान् प्रौढिः इष इच्छायां तुदा
दिः इष गतौ दिवादिः इष आभीक्ष्ण्ये क्र्यादिः एषां घञि ण्यति च एषः एष्य इति रूपे त
त्र पररूपे प्राप्तेऽनेन वृद्धिः प्रैषः प्रैष्यः यस्तु ईष उंछे यश्च ईष गतिहिंसादर्शनेषु त
योर्दीर्घोपधत्वादीषः ईष्यः तत्राद्गुणे प्रेषः प्रेष्यः ऋते च तृतीयासमासे सुखेन ऋतः सु
खार्तः तृतीयेति किं परमर्तः प्रवत्सतरकंबलवसनार्णदशानामृणे प्रार्णं वत्सतरा

© Dharmartha Trust J&K. Digitized by eGangotri

कौ·सार· र्णे इत्यादि। ऋणस्यापनयनाय यदन्यदृणं क्रियते तदृणार्णं दशार्णो देशः नदी च दशा
९ र्णं ऋणशब्दो दुर्गभूमौ जले च उपसर्गादृति धातौ अवर्णान्तादुपसर्गादृकारादौ धातौ
9 परे वृद्धिरेकादेशः स्यात् उपार्छति अंतादिवच्च योयमेकादेशः स पूर्वस्यांतवत्परस्या
दिवत्स्यादिति रेफस्य पदांतत्वे खरवसानयोर्विसर्जनीयः खरि अवसाने च रेफस्य वि
सर्जनीयः स्यात्पदांते इति विसर्गे प्राप्ते अंतवद्भावेन पदांतस्य न विसर्गः उभयथर्क्षु क
र्तरि चर्षिदेवतयोरित्यादिनिर्देशात् उपसर्गेणैव धातोराक्षेपे सिद्धे धाताविति योगवि
भागेन पुनर्विधानार्थं तेन सत्यक इति पाक्षिकोपि प्रकृतिभावोत्र न भवति वा सुप्या
पिशलेः अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ वृद्धिर्वा स्यात् आपिशलिग्रहणं पूजा
र्थं प्रार्षभीयति सावर्ण्यात् ऌवर्णस्य ग्रहणं प्राल्कारीयति प्रल्कारीयति तपरत्वा ९

© Dharmartha Trust J&K. Digitized by eGangotri

दीर्घेन उपर्कारीयति उपल्कारीयति एङि पररूपं आदुपसर्गादेङादौ धातौ
परे पररूपमेकादेशः स्यात् प्रेजते उपोषति इह वा सुपीत्यनुवर्त्य वाक्यभेदेन व्या
ख्येयं तेन एङादौ सुब्धातौ वा उपेडकीयति उपैडकीयति प्रोघीयति प्रौघीयति एवं
चानियोगे नियोगोऽवधारणं क्वेव भोक्ष्यसे अनवक्लृप्तावेवशब्दः अनियोगे किं तवैव
व अचोऽन्त्यादि टि अचां मध्ये योऽन्त्यः स आदिर्यस्य तत् टिसंज्ञं स्यात् शकन्ध्वादिषु पररूपं
वाच्यं तच्च टेः शकन्धुः कर्कन्धुः कुलटा सीमन्तः केशवेशे सीमान्तोऽन्यः मनीषा हलीषा लां
गलीषा पतञ्जलिः सारङ्गः पशुपक्षिणोः सारगोऽन्यः आकृतिगणोऽयं मार्तण्डः ओत्वोष्ठ
योः समासे वा स्थूलोतुः स्थूलौतुः बिम्बोष्ठः बिम्बौष्ठः समासे किं तवौष्ठः ओमाङोश्च ।
ओमि आङि चात्परे पररूपमेकादेशः स्यात् शिवायोन्नमः शिवएहि शिवेहि अव्यक्तानु

© Dharmartha Trust J&K. Digitized by eGangotri

करणस्यात्तइतौ ध्वनेरनुकरणस्ययोतशब्दस्तस्मादितौपरेपररूपमेकादेशः
स्यात् पटत्इतिपटिति एकाचोन अदिति नाम्रेडितस्यांत्यस्यतुवा आम्रेडितस्यप्रा
गुक्तं नस्यात् अंत्यस्यतुतकारमात्रस्यवास्यात् डाचिबहुलंद्वेभवतइतिबहुलवचना
द्वित्वं तस्यपरमाम्रेडितसंज्ञंस्यात् पटत्पटेति झलांजशोन्ते पदांतेझलांजशःस्युःप
टत्पटदिति अकःसवर्णेदीर्घः अकःसवर्णेऽचिपरेदीर्घएकादेशःस्यात् दैत्यारिःश्री
शः विष्णूदयः अचिकिं कुमारीशेते नाज्झलाविति सावर्ण्येनिषेधस्तेन दीर्घशकार
योःग्रहणकशास्त्रस्यसावर्ण्येविधिनिषेधाभ्यां प्रागनिष्पत्तेः अकःकिं हरये अकोकि
दीर्घइत्येवसुवचं ऋतिसवर्णेऋवा होतृकारः होतृकारः ऌतिसवर्णेऌवा होतॢ
कारः पक्षेऋकारः सावर्ण्यात् होतृकारः ऋतिऌवालृतिलृवेत्युभयत्रापिविधेयंव

© Dharmartha Trust J&K. Digitized by eGangotri

ऐद्वयं द्विमात्रं आद्यस्य मध्ये द्वौ रेफौ तयोरेका मात्रा अभितोज्झक्तेर पराद्विती
यस्य तु मध्ये द्वौ लकारौ शेषं प्राग्वत् ॥ इह मयत्रापि सत्यक इति पाक्षिकः प्रकृतिभा
वो वक्ष्यते एङः पदांतादति पदांतादेङो ति परे पूर्वरूपमेकादेशः स्यात् हरेव विष्णो
व सर्वत्र विभाषा गोः लोके वेदे च एङंतस्य गोरति वा प्रकृतिभावः स्यात् पदांते गोअ
ग्रं गोग्रं एङंतस्य किं चित्रग्वग्रं पदांते किं गोः अवङ् स्फोटायनस्य अतीति निवृत्तं
अचि परे पदांते गोरवङ् वा स्यात् गवाग्रं पदांते किं गवि व्यवस्थित विभाषया गवाक्षः
इंद्रे च गोरवङ् स्यादिंद्रे गवेंद्रः अथ प्रकृतिभावः प्लुतप्रगृह्या अचि नित्यं प्लुताः प्रगृह्या
श्च वक्ष्यंते ते चि नित्यं प्रकृत्याः स्युः एहि कृष्ण ३ अत्र गौश्चरति हरी एतौ नित्यमिति किं
हरी एतावित्यादावयमेव प्रकृतिभावो यथा स्यात् इकोऽसवर्णे इति ह्रस्वसमुच्चितो मा

© Dharmartha Trust J&K. Digitized by eGangotri

भूत् इकोसवर्णेशाकल्यस्यह्रस्वश्च पदांताइकोऽसवर्णेचिपरेप्रकृत्याःस्युर्ह्रस्वश्च
वा अत्रह्रस्वविधिसामर्थ्यादेवप्रकृतिभावेसिद्धेतदनुकर्षणंचश्च कारोनकर्त्तव्य इति
भाष्येस्थितं चक्रिअत्र चक्र्यत्र पदांताइतिकिं गौर्यौ नसमासे वाप्यश्वः सितिचपार्श्वं
ऋत्यकः ऋतिपरेऽकः प्राग्वत् ब्रह्मऋषिः ब्रह्मर्षिः पदांताइत्येवआर्छत् समासेप्ययं
प्रकृतिभावः सप्तऋषीणां वाक्यस्यटेःप्लुतउदात्त इत्यधिकृत्य प्रत्यभिवादेऽशूद्रे अशू
द्रविषयेप्रत्यभिवादेयद्वाक्यंतस्यटेःप्लुतःस्यात् अभिवादयेदेवदत्तोहं भोआयुष्मानेध
िदेवदत्ता ३ स्त्रियांन अभिवादयेगार्ग्यहं भोआयुष्मतीभवगार्गि नामगोत्रंवायत्र
प्रत्यभिवादवाक्यांतेप्रयुज्यतेतत्रप्लुतइष्यते नेह आयुष्मानेधि भोराजन्यविशांवे
तिवाच्यं आयुष्मानेधिभो ३ आयुष्मानेधीन्द्रवर्मे३न् आयुष्मानेधीन्द्रपालिता ३ दूरा ११

© Dharmartha Trust J&K. Digitized by eGangotri

हूते च दूरात्संबोधने वाक्यस्य टेः प्लुतः स्यात् सक्तून् पिब देवदत्ता३ हैहे प्रयोगे हैहयोः
एतयोः प्रयोगे दूरात्संबोधने यत् तत्र हैहयोरेव प्लुतः है३ राम रामहै३ गुरोरनन्तोनं
त्यस्याप्येकैकस्य प्राचां दूरात्संबोधने यद्वाक्यं तस्य संबन्धिनः स्यानंत्यस्यात्यस्यापि गुरो
र्वा प्लुतः स्यात् दे३वदत्त देवदा३त्त देवदत्ता३ गुरोः किं वकारादकारस्य मा भूत् अ
नंतः किं कृष्णा३ एकैकग्रहणं पर्यायार्थं इह प्राचामिति विभज्यते तेन सर्वः प्लुतो वि
कल्प्यते अप्लुतवदुपस्थिते उपस्थितोऽनार्ष इति शब्दस्तस्मिन्परे प्लुतोऽप्लुतवद्भव
ति अप्लुतकार्यं यणादिकं करोति सुश्लोका३ इति सुश्लोकेति वा किं अप्लुत इत्युक्ते
ऽप्लुत एव विधीयेत तथा च प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात् अग्ना३
इति ईचाक्रवर्मणस्य ईप्लुतोऽचि परेऽप्लुतवद्वा चिनुहीदं चिनुही३ इति · चिनुहीति·
चिनुही३इदं

© Dharmartha Trust J&K. Digitized by eGangotri

उभयत्रविभाषेयम्॰ ईदूदेद्द्विवचनं प्रगृह्यम् ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात् हरी
एतौ विष्णू इमौ गंगे अमू पचेते इमौ मणीवोष्ट्रस्येति त्विवार्थे वशब्दो वाशब्दो वा वोध्यः
अदसो मात् अस्मात्परावीदूतौ प्रगृह्यौ स्तः अमी ईशाः रामकृष्णावमू आसाते मा
त्किं अमुकेऽत्र असति माद्ग्रहणे एकारोप्यनुवर्त्तेन शे अयं प्रगृह्यः स्यात् अस्मे इं
द्रावृहस्पती निपात एकाजनाङ् एकोऽज्निपात आङ्वर्जः प्रगृह्यः इ इ विस्मये इ इं
द्रः उ उमेशः अनाङित्युक्तेरङिदाकारः प्रगृह्य एव आ एवं नु मन्यसे आ एवं किल तत्
त् ङित्तु न प्रगृह्यः ईषदुष्णं ओष्णं वाक्यस्मरणयोरङित् अन्यत्र ङिदिति विवेकः ओ
त् ओदन्तो निपातः प्रगृह्यः अहो ईशाः संबुद्धौ शाकल्यस्येतावनार्षे संबुद्धिनिमि
त्तक ओकारो वा प्रगृह्योऽवैदिके इतौ परे विष्णो इति विष्णविति विष्ण इति अना

© Dharmartha Trust J&K. Digitized by eGangotri

र्धमिति किं ब्रह्मबंधविति उञः उञ इतौ वा प्रागुक्तं उ इति विति ऊँ उञ इतौ दी
र्घोऽनुनासिकः प्रगृह्यश्च ऊँ इत्ययमादेशो वा स्यात् ऊँ इति मय उञो वो वा म
यः परस्योञो वो वा स्यादचि किम्वुक्तं किमु उक्तं वस्यासिद्धत्वान्नानुस्वारः ईदूतौ
च सप्तम्यर्थे सप्तम्यर्थे पर्यवसन्नमीदूदंतं प्रगृह्यं स्यात् सोमो गौरी अधिश्रितः
मामकीनतनू इति सुपां सुलुगिति सप्तम्या लुक् अर्थग्रहणं किं वृत्तावर्थांतरोप
संक्रांते माभूत् वाप्यामश्वो वाप्यश्वः अणोऽप्रगृह्यस्यानुनासिकः अप्रगृह्यस्या
णोऽवसानेनुनासिको वा स्यात् दधिँ दधि अप्रगृह्यस्य किं अग्नी इत्यच्संधिः
स्तोः श्चुना श्चुः सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः हरिश्शे
ते रामश्चिनोति सच्चित् शार्ङ्गिञ्जय शात् शात्परस्य तवर्गस्य चुत्वं न विश्नः

© Dharmartha Trust J&K. Digitized by eGangotri

प्रश्नः ष्टुना ष्टुः स्तोः ष्टुना योगे ष्टुः स्यात् रामष्षष्ठः रामष्टीकते पेष्टा तट्टीकते चक्रि
राड्ढौकसे न पदान्ताट्टोरनाम् अनामिति लुप्तषष्ठीकं पदान्ताट्टवर्गात्परस्यां स्तोः ष्टु नाम
र्न षट् सन्तः षट् ते पदान्तात्किं ईट्टे तोः किं सर्पिष्टमं अनाम्नवतिनगरीणामिति
वाच्यं षण्णां षण्णवतिः षण्णगर्यः तोः षि तवर्गस्य षकारे ष्टुत्वं न सन्षष्ठः झलां जशो
न्ते वागीशः चिद्रूपं यरोऽनुनासिकेऽनुनासिको वा यरः पदान्तस्यानुनासिके परे
ऽनुनासिको वा एतन्मुरारिः एतद्मुरारिः स्थानप्रयत्नाभ्यामन्तरतमः स्पर्शे चरितार्थो
विधिरयं रेफे न प्रवर्त्तते चतुर्मुखः प्रत्यये भाषायां नित्यं तन्मात्रं चिन्मयं कथं तर्हि
मद्योदग्राः ककुन्मन्त इति यवादिगणे दकारनिपातनात् तोर्लि तवर्गस्य लकारे परे
परसवर्णः तल्लयः विद्वांल्लिखति नकारस्यानुनासिको लकारः उदः स्थास्तम्भोः पू १३

र्वस्य उदः परयोः स्थास्तंभोः पूर्वसवर्णः स्यात् आदेः परस्य उत्थानं उत्तंभनं अत्राघो
षस्य महाप्राणस्य सस्य तादृश एव थकारः तस्य झरो झरीति पाक्षिको लोपः लोपाभा
वपक्षे तु थकारस्यैव श्रवणं न तु खरि चेति चर्त्वं चर्त्वं प्रति थस्यासिद्धत्वात् झयो होन्य
तरस्यां झयः परस्य हस्य पूर्वसवर्णो वा स्यात् घोषवतो नादवतो महाप्राणस्य संवृ
तकंठस्य हस्य तादृशो वर्गचतुर्थ एवादेशः वाग्घरिः वाग्हरिः शश्छोटि पदांतात्
झयः परस्य शस्य छो वा स्यादटि दस्य चुत्वेन जकारे कृते खरि च खरि झलां चरः
स्युः इति जकारस्य चकारः तच्छिवः तच्शिवः पदांतात् किं विरप्शं छत्वममीति वा
च्यं तच्छ्लोकेन तच्श्लोकेन अमि किं वाक्श्च्योतति मोऽनुस्वारः मांतस्य पदस्या
नुस्वारः स्याद्धलि अलोंत्यस्य हरिं वंदे पदस्येति किं गम्यते नश्चापदांतस्य झलि न

© Dharmartha Trust J&K. Digitized by eGangotri

कौ॰सार॰ स्यमस्यचापदांतस्यझल्यनुस्वारः यशांसि आक्रंस्यते झलि किं मन्यते अनुस्वार
१५ स्य ययि परसवर्णः स्पष्टं अङ्कितः अञ्चितः कुण्ठितः शान्तः गुम्फितः कुर्वन्तीत्यत्र
15 णत्वे प्राप्ते तस्यासिद्धत्वादनुस्वारे परसवर्णे च कृते तस्यासिद्धत्वान्न णत्वं वापदांत
स्य पदांतस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात् त्वङ्करोषि त्वंकरोषि सय्यंता
संय्यंता संवत्सरः सँव्वत्सरः यंलोकं यँल्लोकं अत्रानुस्वारस्य पक्षेऽनुनासिकाय
वत्वाः मोराजिसमः क्वौ क्विबंते राजतौ परे समो मस्य म एव स्यात् सम्राट् हे मपरे वा
मपरे हकारे परे मस्य म एव स्याद्वा ह्मल ह्वल चलने किम्ह्मलयति किं ह्मलयति
यवलपरे यवला वेति वक्तव्यं यथासंख्यमनुदेशः समानां सम्बन्धी विधिर्यथासं
ख्यं स्यात् कियँह्यः किंह्यः किवँह्वलयति किंह्वलयति किलँह्लादयति किंह्लाद १५

© Dharmartha Trust J&K. Digitized by eGangotri

यति नपरे नः नपरे ह्कारे परे मस्य नः स्याद्वा किन्ह्नुते किंह्नुते ङ्णोः कुक्टुक्श
रि ङकारणकारयोः कुक्टुकागमौ वा स्तः शरि कुक्टुकोरसिद्धत्वाज्जश्त्वं न चयो
द्वितीयाः शरि पौष्करसादेरिति वाच्यं प्राङ्ख्षष्ठः प्राङ्क्षष्ठः प्राङ्षष्ठः सुगण्ठ्ष
ष्ठः सुगण्ट्षष्ठः सुगण्षष्ठः डः सि धुट् डात्परस्य सस्य धुड्वा स्यात् षट्त्संतः षट्
संतः नश्च नकारांतात्परस्य धुड्वा स्यात् सन्त्सः सन्सः शि तुक् नस्य पदांतस्य शे परे तु
ग्वा स्यात् शश्छोऽटीति छत्वविकल्पः पक्षे झरो झरीति च लोपः सञ्छंभुः सञ्च्छंभुः स
ञ्चशंभुः सञ्शंभुः ञछौ ञचछा ञचशा ञशाविति चतुष्टयं रूपाणामिह तु क्छत्वच
लोपानां विकल्पनात् ङमो ह्रस्वादचि ङमुण्नित्यं ह्रस्वात्परो यो ङम् तदंतं यत्पदं त
स्मात्परस्याचो नित्यं ङमुडागमः स्यात् प्रत्यङ्ङात्मा सुगण्णीशः सन्नच्युतः समः सुटि

© Dharmartha Trust J&K. Digitized by eGangotri

समो रुः स्यात्सुटि अलोंत्यस्य अत्रानुनासिकः पूर्वस्य तु वा अत्र रुप्रकरणे रोः पू
र्वस्यानुनासिको वा स्यात् अनुनासिकात्परोनुस्वारः अनुनासिकं विहाय रोः पूर्वस्मा
त्परोनुस्वारागमः स्यात् खरवसानयोर्विसर्जनीयः विसर्जनीयस्य सः खरि विसर्ज
नीयस्य सः स्यात् एतदपवादेन वा शरि इति पाक्षिके विसर्गे प्राप्ते संपुंकानां सो वक्तव्यः
सँस्स्कर्त्ता संस्स्कर्त्ता समो वा लोपमेके इति भाष्यं लोपस्यापि रुप्रकरणस्थत्वादनुस्वा
रानुनासिकाभ्यामेकसकारं रूपद्वयं द्विसकारं तूक्तमेव तत्रानचि चेति सकारद्वि
त्वपक्षे त्रिसकारमपि रूपद्वयं अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमाना
मकारोपरि शर्षु च पाठस्योपसंख्यातत्वेनानुस्वारस्याप्यच्त्वात् अनुनासिकवतां त्र
याणां शरः खयः इति कद्वित्वे षट् अनुस्वारवतामनुस्वारस्यापि द्वित्वे द्वादश एषाम ९५

© Dharmartha Trust J&K. Digitized by eGangotri

ष्टादशानां नकारद्वित्वे वचनान्नरेण पुनर्द्वित्वे च एकनं द्वितं त्रिनमिति चतुःपंचाशत् अणोनुनासिकत्वेऽष्टोत्तरं शतं पुमः खय्यम्परे अम्परे खयि पुम् शब्दस्य रुः स्यात् व्युत्पत्तिपक्षे अप्रत्ययस्येति षत्वपर्युदासात् ऽकऽपयोः प्राप्तौ अव्युत्पत्तिपक्षे तु षत्वप्राप्तौ सं पुं कानामिति सः पुंस्कोकिलः पुंस्कोकिलः पुंस्पुत्रः पुंस्पुत्रः अम्परे किं पुंक्षीरं खयि किं पुंदासः ख्याजादेशेन पुंख्यानं नश्छव्यप्रशान् अम्परे छवि नकारांतस्य पदस्य रुः स्यान्न तु प्रशान् शब्दस्य विसर्गः सत्वं श्चुत्वं शार्ङ्गिंश्छिंधि शार्ङ्गिंश्छिंधि चक्रिंस्त्रायस्व चक्रिंस्त्रायस्व पदस्य किं हंति अम्परे किं सन्त्सरुः खड्गमुष्टिः अप्रशान् किं प्रशान् तनोति नॄन्पे नॄनित्यस्य रुः स्याद्वा पकारे परे कुप्वोः ऽकऽपौ च कवर्गपवर्गे च परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तश्चाद्विसर्गः य

© Dharmartha Trust J&K. Digitized by eGangotri

नेनाप्राप्तिन्यायेन विसर्जनीयस्य सत्वस्यापवादोयं नतु शर्परे विसर्जनीयइत्यस्य
तेन वासः क्षौममित्यादौ विसर्ग एव नॄँ ऽ पाहि नॄँ ऽ पाहि नॄँः पाहि नॄन् पाहि कानाम्रे
डिते कान्नकारस्य रुः स्यादाम्रेडिते परे सं पुं कानामिति सः यद्वा कस्कादिषु च एषि
एउन्नरस्य विसर्गस्य षः स्यादन्यस्य तु सः ऽ क ऽ पयोरपवादः इति सः कांस्कान् कांस्का
न् कस्कः कौतस्कुतः सर्पिष्कुंडिका धनुष्कपाले आकृतिगणोयं संहितायामित्यधि
कृत्य छे च ह्रस्वस्य छे परे तुगागमः स्यात्संहितायां चुत्वस्यासिद्धत्वाज्झोश्चान्नदः ततत
श्चत्वस्यासिद्धत्वात्पूर्वं चुत्वेन जः तस्य चर्त्वेन चः चुत्वस्यासिद्धत्वाच्चोः कुरिति कुत्वं
न स्वच्छाशिवच्छाया आङ्माङोश्च एतयोश्छे तु क् स्यात् पदांताद्वेति विकल्पापवा
दः आच्छादयति माच्छिदत् दीर्घात् दीर्घाच्छे परे तुक् स्यात् दीर्घस्यायं तुक् न तु छ १६

© Dharmartha Trust J&K. Digitized by eGangotri

स्य सेनासुराच्छायेतिज्ञापकात् चेच्छिद्यते पदांताद्वादीर्घात्पदांताच्छेपरे तुग्वा स्यात् लक्ष्मीच्छाया लक्ष्मीछाया इति संधिः विसर्जनीयस्यसः विष्णुस्त्राता शर्प रेविसर्जनीयः शर्परेखरि विसर्जनीयस्य विसर्जनीयोनत्वन्यत् कः त्सरुः घनाघनः क्षोभणः इत्यथा यथ्यंसत्वंजिव्हामूलीयश्चन वाशरि शरिपरेविसर्जनीयस्यविस र्जनीयएववास्यात् हरिः शेते हरिश्शेते खर्यरेशरिवा विसर्गलोपोवक्तव्यः रामस्था ता रामःस्थाता रामस्स्थाता हरिस्फुरति हरिःस्फुरति हरिस्स्फुरति पक्षेविसर्गसत्वे चत्रैरूप्यं कुप्वोः ᳵकᳵपौच कःकरोति कᳵकरोति कःखनति कᳵखनति कःपठ ति कᳵपठति कःफलति कᳵफलति सोपदादौ विसर्जनीयस्यसः स्यादपदाद्योः कुप्वोः पयस्पाशं यशस्कल्पं यशस्कं यशस्काम्यति अनव्ययस्येतिवाच्यं प्रातःक

© Dharmartha Trust J&K. Digitized by eGangotri

त्वं काम्येरोरे वेति वाच्ये नेह गीः काम्यति इणः षः इणः परस्य विसर्गस्य षः स्यात् पू
र्वविषये सर्पिष्याशं सर्पिष्कल्पं सर्पिष्कं सर्पिष्काम्यति नमस्पुरसोर्गत्योः गतिसंज्ञ
योरनयोर्विसर्गस्य सः स्यात्कुप्वोः परयोः नमस्करोति साक्षात्प्रभृतित्वात्कृञोयोगे
विभाषागतिसंज्ञा तदभावेनमः करोति पुरोव्ययमिति नित्यंगतिसंज्ञा पुरस्करोति
अगतित्वान्नेह पूः पुरौ पुरः प्रवेष्टव्याः इदुदुपधस्य चाप्रत्ययस्य इकारोकारोपध
स्याप्रत्ययस्य विसर्गस्य षः स्यात्कुप्वोः निष्प्रत्यूहं आविष्कृतं दुष्कृतं अप्रत्ययस्य किं
अग्निः करोति वायुः करोति एकादेशशास्त्रनिमित्तकस्य न षत्वं कस्कादिषु भ्रातुष्पु
त्रस्य पाठात्तेनेह न मातुः कृपा मुहुसः प्रतिषेधः मुहुः कामा तिरसोन्यतरस्यां सो वा
स्यात्कुप्वोः तिरस्कर्त्ता तिरः कर्त्ता द्विस्त्रिश्चतुरिति कृत्वोर्थे कृत्वोर्थे वर्त्तमानानामे १७

© Dharmartha Trust J&K. Digitized by eGangotri

घों विसर्गस्य षकारो वा स्यात्कुप्वोः द्विष्करोति द्विःकरोति इत्यादि कृत्वोर्थे किं च
तुष्कपालः इसुसोः सामर्थ्ये एतयोर्विसर्गस्य षः स्याद्वा कुप्वोः सर्पिष्करोति सर्पिःक
रोति धनुष्करोति धनुःकरोति सामर्थ्यमिह व्यपेक्षा सामर्थ्ये किं तिष्ठतु सर्पिः पि
वत्वमुदकं नित्यं समासेनुत्तरपदस्थस्य इसुसोर्विसर्गस्यानुत्तरपदस्थस्य समा
से नित्यं षः स्यात्कुप्वोः परयोः सर्पिष्कुंडिका अनुत्तरपदस्थस्य किं परमसर्पिःकुंडि
का कस्कादिषु सर्पिष्कुंडिकाशब्दोऽसमासे व्यपेक्षाविरहेपि षत्वार्थः व्यपेक्षायां नि
त्यार्थश्च अतः कृकमिकंसकुंभपात्रकुशाकर्णीषु नव्ययस्य अकारादुत्तरस्यान
व्ययविसर्गस्य समासे नित्यं सकारादेशः स्यात्करोत्यादिषु परेषु न तूत्तरपदस्थस्य
अयस्कारः अयस्कामः अयस्कंसः अयस्कुंभः अयस्पात्रं अयः सहिता कुशा अय

© Dharmartha Trust J&K. Digitized by eGangotri

कौ॰सार॰ स्कुशा अयस्कर्णी अतः किंगीःकारः अनव्ययस्य किं स्वः कामः समासे किं यशः
१८ करोति अनुत्तरपदस्थस्य किं परमयशःकारः अधःशिरसी पदे एतयोर्विसर्ग
18 स्य सादेशः स्यात् पदशब्दे परे अधस्पदं शिरस्पदं समास इत्येव अधःपदं शि
रः पदं अनुत्तरपदस्थस्येत्येव परमशिरःपदं कस्कादिषु च भास्करः इति विस
र्गसंधिः स्वौजसमौडिति सुप्रत्यये शिवस् अर्च्य इति स्थिते ससजुषो रुः पदांतस्य
सस्य सजुष् शब्दस्य च रुः स्यात् जश्त्वापवादः अतो रोरप्लुतादप्लुते अप्लुतादतः
परस्य रोरुः स्यादप्लुते ऽति भोभगो इति प्राप्तस्य यत्वस्यापवादः उत्वे प्राप्ते रुत्वस्या
सिद्धत्वे तु न भवति रुत्वमनूद्य उत्वविधेः सामर्थ्यात् प्रथमयोः पूर्वसवर्णः अकः
प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात् इति प्राप्ते नादिचि अ १८

© Dharmartha Trust J&K. Digitized by eGangotri

वर्णादिचिनपूर्वसवर्णेदीर्घःस्यात् आद्गुणः एङः पदांतादति शिवोऽर्च्यः अतइति
तपरः किं देवाअत्र अतीति तपरः किं श्वआगंता अप्लुतात्किं एहिसुस्रोता३ अत्रस्ना
हि प्लुतस्यासिद्धत्वादतःपरोयं अप्लुतादितिविशेषणे तु न तत्सामर्थ्यान्नासिद्धत्वं तप
रकरणस्य तु न सामर्थ्यं दीर्घनिवृत्त्याचरितार्थत्वात् अप्लुतेइ किं तिष्ठतु पय आ३
ग्निदत्ते गुरोरनृत इति प्लुतः हशि च अप्लुतादतःपरस्य रोरुः स्याद्धशि शिवोवंद्यः रो
रित्युकारानुबंधग्रहणान्नेह प्रातरत्र धातर्गच्छ देवास इह इति स्थिते रुत्वे भोभगो
अघोअपूर्वस्य योशि एन तत्पूर्वस्य रोर्यादेशः स्यादशि परे असंधिः सौत्रः लोपः शा
कल्यस्य देवा इह देवायिह अशि किं देवाः संति यद्यपीह यत्वस्यासिद्धत्वाद्विसर्गो
लभ्यते तथापि विसर्गस्य स्थानिवद्भावेन रुत्वाद्यत्वं स्यात् नह्ययमल्विधिः रोरि

© Dharmartha Trust J&K. Digitized by eGangotri

निसमुदायाश्रयणात् मोसभगोसअघोसइति सकारांतानिपाताः तेषांरोर्यत्वेकृ
२९ त्वे -- व्योर्लघुप्रयत्नतरःशाकटायनस्य पदांतयोर्वकारयकारयोर्लघूच्चारणे
वयोर्वास्तोऽशि यस्योच्चारणेजिह्वाग्रोपाग्रमध्यमूलानांशैथिल्यंसलघूच्चारणः
ओतोगार्ग्यस्य ओकारात्परस्यपदांतस्यालघुप्रयत्नस्ययकारस्यनित्यंलोपःस्या
त् गार्ग्यग्रहणंपूजार्थं भोअच्युत लघुप्रयत्नपक्षेभोयच्युत।पदांतस्यकिं तोयं
उञिचपदे अवर्णपूर्वयोःपदांतयोर्यवयोर्लोपउञि सउएकाग्निः पदेकिं तंत्वयु
तेवेञः संप्रसारणेरूपं यदितुप्रतिपदोक्तनिपातउञितिगृह्यते तर्ह्युत्तरार्थंप
दग्रहणं लक्षणप्रतिपदोक्तयोःप्रतिपदोक्तस्यैवग्रहणंनतुलाक्षणिकस्येतिन्या
यात् हलिसर्वेषां भोभगोअघोअपूर्वस्यलघ्वलघूच्चारणस्ययकारस्यलोपः

© Dharmartha Trust J&K. Digitized by eGangotri

स्यादुक्लिसर्वेषांमतेन भोदेवाःभोलक्ष्मि भोविद्वद्वृंद भगोनमस्ते अघोयाहि दे
वानभ्याःदेवायांति ह्लिकिं देवायिहरोसुपि अह्नोरेफादेशःस्यान्नतुसुपिरोर
पवादः अहरहः अहर्गणः असुपिकिं अहोभ्यां अत्राहन्निति रुत्वं रूपरात्रिरथंत
रेषुरुत्वंवाच्यं अहोरूप गतम अहोरात्रिरेषा एकदेशविकृतस्यानन्यत्वात् अहोरा
त्रः अहोरथंतरं अहरादीनांपत्यादिषुवारेफःविसर्गापवादः अहर्पतिः गीर्पतिःधू
र्पतिःपक्षेविसर्गोपध्मानीयो रोरि रेफस्यरेफेपरेलोपःस्यात् ढ्रलोपेपूर्वस्यदीर्घो
णः ढरेफौलोपयतीतितथातस्मिन्वर्णेऽर्थोऽकाररेफात्मकेपरे पूर्वस्याणोदीर्घः
स्यात् पुनारमते हरीरम्यः शंभूराजते अणः किं तृढः वृढः त्व हृङ्सायांवह्उद्य
मने पूर्वग्रहणमनुत्तरपदेपिपूर्वमात्रस्यदीर्घार्थं अजघाःलीढःमनस्रथ इत्य

© Dharmartha Trust J&K. Digitized by eGangotri

त्रकृत्वेकृते हशिचेत्युत्वे रोरीतिलोपे च प्राप्ते विप्रतिषेधे परं कार्य्यं तुल्यबलविरो
धे परं कार्यं स्यात् इति लोपे प्राप्ते पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव मनो
रथः एतत्तदोः सुलोपोऽकोरनञ्समासे हलि अककारयोरेतत्तदोर्यः सुस्तस्य लो
पः स्याद्धलि न तु नञ्समासे एष विष्णुः स शंभुः अकोः किं एषको रुद्रः अनञ्समासे
किं असः शिवः हलि किं एषोऽत्र सोऽचि लोपे चेत्पादपूरणं सइत्यस्य सो लोपः स्याद
चि पादश्चेल्लोपे सत्येव पूर्य्येत सेमामविड्ढि प्रभृतिं इ हस्तेकपाद एव ग्रहूत इति वा
मनः अविशेषाच्छ्लोकपादेऽपीत्यपरे सैष दाशरथी रामः लोपे चेदिति किं स इत्
क्षेति स एवमुक्त्वा स त्येवेत्यवधारणेन तु स्यष्ठुरसिव कृतमिति पूर्वसूत्राद्वकुल
ग्रहणानुवृत्त्यालः अन्ते तेनेह न सोऽहमाजन्मशुद्धानां इति स्वादिसंधिः अथ वद

© Dharmartha Trust J&K. Digitized by eGangotri